इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

दिनाङ्क : 13/07/2025 सायम् - 06:20

आदौ-मुख्यवार्ता:

- रक्षामन्त्री राजनाथसिंहः अवदत् यत् सिन्दूराभियानावधौ ब्रह्मोस-क्षेपणास्त्रस्य प्रदर्शनं उल्लेखनीयम् प्रदर्शनानन्तरं विदेशेषु अपि ब्रह्मोस्-क्षेपणास्त्रस्य आवश्यकता वर्धितास्ति।
- राष्ट्रपतिना द्रौपदी मुर्मूः वर्यया प्रसिद्धः विधिवेत्ता उज्ज्वल-देवराव-निकमः, सामाजिक कार्यकर्ता सी. सदानंदन मास्टरः, पूर्व विदेश सचिवः हर्षवर्धन श्रृंगला, प्रसिद्धा शिक्षाविद् डॉ. मीनाक्षी जैनः चे राज्यसभायै प्रचिताः।
- अमेरिकायां फेडरल ब्यूरो ऑफ इन्वेस्टिगेशन इत्यनेन अन्तर्राष्ट्रीय-आतङ्कवादीनां कृते प्रमुख-कार्याचरणं कुर्वता अष्ट-खालिस्तानीयातंकवादिनां निगडनं कृतमस्ति।
- भारतीय-अन्तरिक्षयात्री-समूहस्य दलनायकः शुभांशु-शुक्लः अपि च एक्सिओम्-4-मिशन इत्यस्य अन्ये त्रयः चालकदलस्य सदस्याः श्वः पृथिव्यां प्रत्यावर्तनस्य यात्रायाः आरम्भः करिष्यन्ति।
- टेस्ट्-क्रिकेट्-क्रीडायाम् एण्डरसन्-तेंदुलकर-ट्राफीति क्रीडास्पर्धायाः तृतीया टेस्ट्-क्रीडा भारत-इङ्ग्लैण्ड्योः मध्ये लंदनस्य लॉर्डस् क्रीडाङ्गणे प्रचलति।

राजनाथः

रक्षामन्त्री राजनाथसिंहः अवदत् यत् सिन्दूराभियानावधौ ब्रह्मोस-क्षेपणास्त्रस्य प्रदर्शनं उल्लेखनीयम् आसीत्। सिन्दूराभियानस्य अनन्तरं विदेशेषु अपि ब्रह्मोस्-क्षेपणास्त्रस्य आवश्यकता वर्धितास्ति। उत्तरप्रदेशस्य पूर्वमुख्यमन्त्रिणः

चन्द्रभानुगुप्तायाः स्वसंसदीयक्षेत्रस्य लखनऊ-नगरस्य द्विदिवसीययात्रायाः द्वितीयदिने राजकीय-स्नातकोत्तर-महाविद्यालये प्रतिमायाः अनावरणं कुर्वन् रक्षामन्त्री अवदत् यत् चतुर्दश देशैः ब्राहमोस्-क्षेपणास्त्राणि याचितानि सन्ति, तस्य निर्यातः लखनऊ-नगरात् अपि भविष्यति। एतेन राज्ये वृत्यावसरणां सम्वर्धने साहाय्यं भविष्यति।

राष्ट्रपति-राज्यसभा

राष्ट्रपतिना द्रौपदी मुर्मूः वर्यया प्रसिद्धः विधिवेत्ता उज्ज्वल-देवराव-निकमः, सामाजिक कार्यकर्ता सी. सदानंदन मास्टरः, पूर्व विदेश सचिवः हर्षवर्धन श्रृंगला, प्रसिद्धा शिक्षाविद् डॉ. मीनाक्षी जैनः चेति राज्यसभायै प्रचिताः। गृह मंत्रालयेन एकां अधिसूचनां प्रख्याप्य निर्णयोयं विज्ञापितः। महाराष्ट्रस्य निवासी श्री निकमः मुंबई आतंकवाद्याक्रमणस्य प्रकरणानां प्रशासनिक विधिवेत्ता वर्तते। केरलस्य सी. सदानंदन मास्टरः शैक्षिक जगति दीर्घकालिक अनुभवस्य कृते विज्ञायते। श्री श्रृंगला संयुक्त राज्य अमेरिका, बांग्लादेश, थाईलैंड चेत्येषु देशेषु राजदूतरूपेण कार्यरताः आसीत्। सः त्रयोविंशत्यधिकद्विहस्र-तमे वर्षे भारतस्य जी -20 इत्यस्य अध्यक्षतायै मुख्य समन्वयकः आसीत्। डॉ. जैनः दिल्ली विश्वविद्यालयस्य गार्गी महाविद्यालये इतिहास-विषयस्य सहाचार्या आसीत्। राष्ट्रपतिः कला, साहित्य, विज्ञान सामाजिक चेत्येषु सेवासु तेषां योगदानाय संसदि उच्च सदनाय द्वादश जनानां चयनं करोति। प्रधानमन्त्री नरेन्द्रमोदी सोशल-मीडिया संदेश माध्यमेन संसदः उच्चसदने नामाङ्कितानां चतुर्णां जनानां कृते शुभकामनाः प्रदत्तवान्। इतः परं घोषणायाः अनन्तरं स्व प्रतिक्रियां प्रकटीकुर्वन् विशेषः लोक-अभियोजकः उज्वल-निकमः वार्ताहरैः सह संभाषितवान् यत् एषः गर्वस्य विषयः इति।

खालिस्तानी-आतंकवादिनः

अमेरिकायां फेडरल ब्यूरो ऑफ इन्वेस्टिगेशन इत्यनेन अन्तर्राष्ट्रीय-आतङ्कवादीनां कृते प्रमुख-कार्याचरणं कुर्वता अष्ट-खालिस्तान आतंकवादिनां निगडनं कृतम्। एतेषु आतंकवादिषु पंजाब राज्यस्य कुख्यातः आतंकवादी पवित्तर-सिंहबटाला अपि सम्मिलितः वर्तते। बटाला प्रतिबन्धितसमूहस्य बब्बरखालसा इत्यस्य अन्तर्राष्ट्रीय आतङ्कवादीनां गतिविधिनां कृते भारते प्रसिद्धः वर्तते। राष्ट्रीय अन्वेषण अभिकरणेन जून मासे जतिन्दर जोती तथा बब्बर खालसा इत्यस्य नामांकितः आतङ्कवादी लखबीर लण्डा इत्यनेन सह बटाला इत्याख्यस्य नाम एकस्मिन् आरोप पत्र- पञ्जीकारितमस्ति।

<u>अन्तरिक्षयात्री</u>

भारतीय-अन्तरिक्षयात्री-समूहस्य दलनायकः शुभांशु-शुक्लः अपि च एक्सिओम्-4-मिशन इत्यस्य अन्ये त्रयः चालकदलस्य सदस्याः श्वः पृथिव्यां प्रत्यावर्तनस्य यात्रायाः आरभः करिष्यन्ति इति अपेक्षा अस्ति। केन्द्रीय विज्ञान एवं प्रौद्योगिकीमन्त्री डॉ. जितेन्द्रसिंहः सोशल मीडिया सन्देशे अवदत्, यत् श्वः भारतीयमानकसमयानुसारं सायं सार्ध चतुर्वादने अनडॉकिंग् निर्धारितम् अस्ति। सः अवदत्, चालकदलं मंगलवासरे प्रायः सायं त्रिवादने पृथिव्यां आगमिष्यति। दलनायकः श्रीशुक्लः अन्तर्राष्ट्रीय-अन्तरिक्ष-स्थानकं प्रति चतुर्दश दिवसीयाभियाने आसीत् ।यात्रायाः कालखण्डे दलनायकः श्रीशुक्लः सप्त भारत-विशिष्ट-प्रयोगाः अकरोत्। उत्तरप्रदेशस्य लखनऊनगरे वार्ताहरैः सह वार्तालापं कुर्वन् शुभांशु-शुक्लस्य पिता शम्भूदयालः अवदत् यत्, ते ईश्वरं प्रार्थयन्ति यत् सः सुरक्षितरूपेण आगच्छेत्।

<u>विरामः</u>

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः www.newsonair.gov.in वेबसाइट इत्यत्र, अथ newsonair मोबाइल ऐप इत्यत्र अपि उपलब्धो भविष्यति।

प्रधानमन्त्री- तेलुगु अभिनेता

प्रधानमन्त्री नरेन्द्रमोदी प्रख्यातस्य अभिनेतुः निधने दुःखं प्रकटितवान्। प्रसिद्धः तेलुगु चलचित्राणां अभिनेता कोटा श्रीनिवासरावः अद्य हैदराबादनगरे दिवंगतः। सः त्र्यशीति वर्षीयः आसीत्। स्वसन्देशे प्रधानमन्त्री प्रोक्तवान् यत् कोटा श्रीनिवासरावः स्वस्य चलचित्र-प्रतिभायाः, बहुमुखी प्रतिभायाः च कृते स्मर्यते।

जयशंकरः

सिंगापुर गणराज्यस्य यात्रारतः विदेशमन्त्री डॉ. एस.जयशङ्करः अद्य स्वसमकक्षेण विवियन्-बालकृष्णनेन सह अमिलत्। एकस्मिन् अन्तर्जाल-संदेशे डॉ. जयशङ्करः अवदत् यत् सिङ्गापुरं भारतस्य एक्ट ईस्ट नीतेः केन्द्रे अस्ति। विदेशमन्त्री अद्य टेमास्क होल्डिङ्ग्स् इत्यस्य मनोनीताध्यक्षस्य टेओ चि हेन इत्यनेन सह अपि मेलनं कृतवान्। अस्मिन् अवसरे डॉ. जयशङ्करः भारतदेशे परिवर्तनस्य निवेशस्य च अवसराणां विषये चर्चां कृतवान्। एकस्मिन् अन्तर्जालीय संदेशे विवियन् बालकृष्णन् उक्तवान् यत् यथा-यथा विश्वं बहुध्रुवीयं भवति तथा-तथा भारतं एतेषु प्रमुख-ध्रुवेषु अन्यतम-रूपेण महत्त्वपूर्णां भूमिकां निर्वक्ष्यति। सिङ्गापुरस्य यात्रायाः अनन्तरं विदेशमन्त्री एस. जयशङ्करः शङ्घाई सर्वकार सङ्गठनस्य विदेशमन्त्रिणां परिषदि भागं ग्रहितुं चीनदेशस्य तिआन्जिन्-नगरं प्रस्थास्यति।

ऋतु-विभागः

भारत-ऋतु-विज्ञान-विभागेन मध्यप्रदेशे, गोवायां, केरले, तटीयकर्नाटके, जम्मू-कश्मीरे, लद्दाखे च आगामिषु त्रि-चतुर्दिनेषु अत्यधिकवृष्टेः पूर्वानुमानं कृतम्। आगामिषु पञ्चदिनेषु असम, मेघालय, नागालैण्ड्, मणिपुर, मिजोरम, त्रिपुरा, अरुणाचलप्रदेशेषु अपि अत्यधिकवृष्टेः संभावना प्रकटिता। विभागेन मत्स्यजीविभ्यः परामर्शः प्रदत्तः यत् आगामिदिनत्रये केरले, कर्नाटकतटे, लक्षद्वीपे, पश्चिम-मध्य-बङ्गखात्यां केचन भागेषु, दक्षिण-पश्चिम-बङ्गालखात्यां च उद्यमं न कुर्वन्तु।अद्य राष्ट्रियराजधानी दिल्ल्यां वृष्टिः अभवत्। वर्षायाः कारणेन तापमाने न्यूनातागता। उत्तराखण्डे गुरुवासरपर्यन्तं वर्षा भविष्यति इति विभागेन पूर्वानुमितम् अस्ति। अस्माकं संवाददात्रानुसारं पूर्वानुमानं दृष्ट्वा प्रशासनेन सतर्कतायै निर्देशः प्रदत्तः अस्ति। मध्यप्रदेशे प्रचण्डवृष्ट्या अनेकेषु मण्डलेषु जलप्रलयस्य स्थितिः प्रवृत्ता। रीवा, सतना, मैहार, छतरपुर मण्डलानाम् अनेकेषु ग्रामेषु जनाः सुरक्षितस्थानेषु स्थानान्तरिताः।

<u>भारत-इङ्गलैण्ड-टेस्ट-क्रिकेट</u>

टेस्ट्-क्रिकेट्-क्रीडायां एण्डरसन्-तेंदुलकर-ट्राफीति क्रीडास्पर्धायाः तृतीया टेस्ट्-क्रीडा भारत-इङ्ग्लैण्ड्योः मध्ये लंदनस्य लॉर्डस्-क्रीडाङ्गणे प्रचलति। अद्य तृतीय टेस्ट क्रीडाया: चतुर्थे दिने भोजनावकाशं यावत् इंग्लैण्ड् दलेन चतुर्णां क्रीडकानां हानौ अष्ट नवति-धावनांकाः समर्जिताः।

।। इति वार्ता ।।